# ॥ दुर्गापञ्चरत्नम् ॥

ते ध्यान-योगानुगता अपश्यन्
त्वामेव देवीं स्वगुणैर्निगूढाम्।
त्वमेव शक्तिः परमेश्वरस्य
मां पाहि सर्वेश्वरि मोक्षदात्रि॥ १ ॥

देवात्मशक्तिः श्रुतिवाक्यगीता
महर्षि लोकस्य पुरः प्रसन्ना।
गुहा परं व्योम सतः प्रतिष्ठा
मां पाहि सर्वेश्वरि मोक्षदात्रि॥ २ ॥

परास्य शक्तिर्विविधैव श्रूयसे
श्वेताश्व-वाक्योदित-देवि दुर्गे।
स्वाभाविकी ज्ञानबलक्रिया ते
मां पाहि सर्वेश्वरि मोक्षदात्रि॥ ३ ॥

देवात्मशब्देन शिवात्मभूता
यत्कूर्मवायव्यवचो विवृत्या।
त्वं पाशविच्छेदकरी प्रसिद्धा
मां पाहि सर्वेश्वरि मोक्षदात्रि॥ ४ ॥

त्वं ब्रह्मपुच्छा विविधा मयूरी
ब्रह्म-प्रतिष्ठाऽस्युपदिष्ट-गीता।
ज्ञानस्वरूपात्मतयाऽखिलानां
मां पाहि सर्वेश्वरि मोक्षदात्रि॥ ५ ॥

॥ इति श्री-काञ्चीजगद्गुरु-श्री-चन्द्रशेखरेन्द्रसरस्वती-श्रीचरणैः विरचितं श्री-दुर्गापञ्चरत्नं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Durga_Pancharatnam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits